Shri Raghunath Temple MSS. Library,
JAMMU

No. ९४६८

Title गादाधरी.

Author गदाधर:

Extent 23 Age x

Subject न्याय वैशेषिकं

गादाधरी

१५७८

२३ पत्रे

व३

ग० ॥श्रीगणेशाय नमः॥ प्रतियोगितावच्छेदकावच्छिन्नं यन्न भवतीति यथाश्रुतमूलात्पत्पदार्थे साध्ये
१ ताहशप्रतियोगितावच्छेदकावच्छिन्नान्यत्वं प्रतीयते ततश्च वह्निमान् धूमादित्यादौ हेतुसमानाधिकर
णमहानसीयवह्नित्वाद्यवच्छिन्नाभावमादाय दोषो दुर्वारः सर्वेषामेव वह्न्यादीनां ताहशाभावप्रतियो
गितावच्छेदकविशिष्टतया तदन्यत्वासंभवात् यत्पदस्य यद्रूपावच्छिन्नपरतया यद्रूपावच्छिन्नस्य
प्रतियोगितावच्छेदकाः ये ये धर्माः प्रत्येकं तदवच्छिन्नान्यत्वमित्यर्थे साध्यतावच्छेदकस्य तत्तत्प्रतियोगि
तावच्छेदकधर्मावच्छिन्नभेदकूटेन प्रत्येकं सामानाधिकरण्यपर्यवसिते वह्न्यादिसाध्यकहेतौ वह्नित्वा
देर्विभिन्नवह्न्यादिव्यक्त्यंतर्भावेन महानसीयवह्नित्वाद्यवच्छिन्नभेदैः प्रत्येकं सामानाधिकरण्यसत्त्वे
प्येकव्यक्तिकसत्तादिसाध्यके सत्तात्वादौ हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकविशिष्टसत्तात्वाद्य श्रीराम०
वच्छिन्नभेदसामानाधिकरण्यासत्त्वादव्याप्तिः यद्रूपावच्छिन्नं प्रतियोगितावच्छेदकावच्छिन्नाविषय १

कप्रतीतिविषयइत्यर्थे उक्तदोषो दूरोपि यद्रूपं प्रतियोगितावच्छेदकभिन्नं प्रतियोगितावच्छेदकाविषयक
प्रतीतिविषयो वा इत्यत एव सामंजस्ये प्रतियोगितावच्छेदकविशिष्टाविषयकप्रतीतिविषयत्वस्य साध्यताव
च्छेदकविशिष्टे निवेशनमनुचितं एवं स्वरूपसंबंधरूपावच्छिन्नत्वविवक्षया यद्रूपावच्छिन्नं प्रतियो
गित्वं उक्ताभावप्रतियोगितावच्छेदकानवच्छिन्नमित्यर्थे शुद्धवह्नित्वादिरूपसाध्यतावच्छेदकावच्छिन्न
प्रतियोगित्वे महानसीयत्वादिविशिष्टवह्नित्वाद्यनवच्छेद्यत्वं तत्त्वमेव यद्रूपावच्छिन्नं प्रतियोगित्वं तादृ
शप्रतियोगिताभिन्नमित्युक्तौ समवायादिना घटादौ साध्ये संयोगादिना घटादिहेतावति व्याप्तिः संयोगा
दिसंबंधावच्छिन्नघटत्वाद्यवच्छिन्नप्रतियोगितायां हेतुमन्निष्ठाभावप्रतियोगिताभेदसत्त्वात् इदं वाच्यं
ज्ञेयत्वादिसाध्यव्याप्तिवारणाय हेतुमन्निष्ठाभावप्रतियोगितायां साध्यतावच्छेदकसंबंधावच्छिन्नत्व
स्य निवेशनीयतया व्यभिचारिमात्रे एव वा संबंधांतरावच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रतियोगि

ग० २ तायांसाध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगिताभेदसत्त्वेनातिव्याप्तिः स्यादितिप्रतियोगिताभेदमुपेक्ष्य
२ प्रतियोगितावच्छेदकावच्छिन्नभेदोपादानं साध्यतावच्छेदकसंबंधावच्छिन्नत्वभेदानुयोगिसाध्यताव
2 च्छेदकावच्छिन्नप्रतियोगितायांनिवेश्यातिव्याप्तिवारणे केवलान्वयिसाध्यके तादृशप्रतियोगित्वाप्र
सिद्ध्याऽव्याप्तिरितिरीत्यामिश्रव्याख्यापरिष्कारेपि गौरवमित्युपाध्यायोपदिष्टनञ्व्यत्यासपक्षमवलं
ब्य व्याचष्टे प्रतियोग्यसमानाधिकरणेति नच नञ्व्यत्यासेन साध्यतावच्छेदके प्रतियोगितावच्छेदक
भेदनिवेशेपि शुद्धवह्नित्वादौ महानसीयत्वादिविशिष्टवह्नित्वादिभेदस्यासत्वात् साध्यतावच्छेदके
प्रतियोगितावच्छेदकाविषयकप्रतीतिविषयत्वमेव विवक्षणीयं तदपेक्षया साध्यतावच्छेदकावच्छिन्न
प्रतियोगित्वे प्रतियोगितावच्छेदकानवच्छेद्यत्वनिवेशपक्षे न गौरवमिति वाच्यं प्रत्येकं घटादौ घटप एम०
टोभयत्वाद्यवच्छिन्नभेदवत् शुद्धवह्नित्वादौ महानसीयत्वाद्यंतर्भावेन पर्याप्त्या विशिष्टवह्न्याद्य २

धादिभेदेत्वभिन्नत्वेपिर

भावीयप्रतियोगितावच्छेदकत्वावच्छिन्नभेदस्यसुघटत्वात् अवच्छेदकाविषयकप्रतीतिविषयत्वविवक्षामंतरेणै
वप्रतीकारात् अवच्छेदकत्वस्यवह्नित्वमहानसीयत्वादिनिष्ठस्यसंबंधेन तत्र प्रतियोगितावच्छेदकत्वत्वादिना
नुगतरूपेणव्यासज्यवृत्तिताप्रायश्च कवर्तिलक्षणेवह्नित्वादेरवच्छेदकत्वपर्याप्त्यनधिकरणत्वमुपपादित
वतोदीधितिकारस्यानुमतत्वात् सार्वभौमैस्तु विशेषधर्मावच्छिन्नप्रतियोगिताकूटानतिरिक्त सामान्य
धर्मावच्छिन्नप्रतियोगितासंबंधस्यविशेषरूपेणव्यासज्यवृत्तेरपिसामान्यधर्मावच्छिन्नप्रतियोगितासंबंधत्वे
नानुगतेनव्यासज्यवृत्तित्वमितिकंठरवेणैवोक्तं एवंसतिमहानसीयवह्निभिन्नवह्निमानधूमादित्यादौ
साध्यतावच्छेदकमहानसीयवह्निभिन्नत्ववह्नित्वाद्योः प्रत्येकंधूमादिसमानाधिकरणाभावप्रतियोगि
तावच्छेदकत्ववर्याप्त्यनधिकरणत्वेपिप्रकृतानुमितिविधेयतावच्छेदकतायादृशरूपावच्छिन्नेपर्याप्तता
दृशरूपावच्छिन्नानुयोगिताकतादृशावच्छेदकत्वावच्छिन्नभेदस्यैवव्याप्तिघटकत्वोपगमेनेनातिव्याप्तिः

ग० २

3

उक्तस्थलीयानुमितिविधेयतावच्छेदकतापर्याप्त्यवच्छेदक दर्शितधर्मद्वयनिष्ठद्वित्वाद्यवच्छिन्नेहेतुमन्नि
ष्ठाभावप्रतियोगितावच्छेदकत्वपर्य्याप्ति मतिविरोधेन तदवच्छिन्नभेदाप्रसत्वात्साध्यतावच्छेदकद्वित्ववह्नित्व
त्वमहानसीयवह्निभिन्नत्ववह्नित्वोभयत्वाद्यनुपस्थिति कालेतदवच्छिन्नेऽनवच्छेदकत्वस्य दुर्ग्रह
तयाऽनुमित्यनुत्पादो व्यापकताज्ञानकारणतावादिनामिष्टएव यत्तु तत्त्वेन हेतोर्निवेशे हेतुव्यक्तिभेदेन
व्याप्तिर्भिद्यते साच नानुमित्युपयोगिनी पक्षीयधूमादिव्यक्तिव्यापकतायाः सर्वं वह्न्यादावगृहीतत्वादि
ति यद्रूपविशिष्टे सुक्तं तथाच धूमत्वादिरूपहेतुतावच्छेदकधर्मेणैव विशिष्य निवेश्य तत्तद्रूपावच्छिन्नहेतु
कानुमित्यौपयिकव्याप्तिर्निर्वाच्या महानसादौ धूमवह्न्यादिसहचारग्रहाद्दृश्यादौ तद्धूमत्वाद्यवच्छिन्ननि
रूपितायाः इव पक्षीयधूमादिसाधारणधूमत्वाद्यवच्छिन्ननिरूपितायाअपि व्यापकतायाग्रहसंभवात्तद्दू
घटितव्याप्तेः पक्षधर्मधूमेग्रहादनुमितिनिर्वाह इति भावः नच सामानाधिकरण्यस्य व्याप्तित्वपक्षे हेतुव्य

राम० २

क्तिभेदेन व्याप्तिभेद आवश्यक एव इति अनुगतरूपेण हेतुनिवेशो व्यर्थ इति वाच्यं हेतुव्यक्तिभेदेन व्याप्ति
भेदेपि अनुगतरूपेण हेतुनिवेशे धूमव्यापकवह्निप्रतियोगिकधूमनिष्ठसामानाधिकरण्यत्वादिना धूमा
दिनिष्ठसकलवह्निसामानाधिकरण्यव्यक्तीनामनुगमात् सामान्यप्रत्यासत्त्या पक्षीयहेतुनिष्ठव्याप्तेरपि
प्रथमं ग्रहसंभवेन अनुमित्युपपत्तेः तत्तद्व्यक्तित्वेन हेतुनिवेशेऽननुगमात् सामान्यप्रत्यासत्त्यापि पक्षी
यहेतुनिष्ठव्याप्तेर्व्याप्तित्वेन दुर्ग्रहतया अनुमित्यनुपपत्तेः हेतुतावच्छेदकाश्रयाधिकरणत्वमुपेक्ष्य तद्वि
शिष्टनिरूपिताधिकरणत्वप्रवेशप्रयोजनमग्रे वक्ष्यते प्रतियोगितानवच्छेदकत्वमात्रेण साध्यतावच्छे
दकनिवेशे वह्नित्वत्वादिना वह्नित्वादिकमनवगाहमानात् प्रतियोगितानवच्छेदकवत्समानाधिकरण
वानित्यादिज्ञानाद्वह्निमानित्याद्यनुमितिः स्यात् न चेष्टापत्तिसंभवः कदाचिद्वह्नित्वेन कदाचित् द्रव्यत्वा
दिना वह्न्यनुमितिरिति नियमानुपपत्तेः न चानवच्छेदकत्वेन तत्तद्धर्मावगाहित्वमेव व्याप्तिग्रहस्यानुमितौ

ग० ५ विधेयतावच्छेदकतयाऽतत्तद्धर्मभाननियामकमिति वाच्यं अनवच्छेदकत्वेन वह्नित्वादिभाने द्रव्यत्वादिभानस्या
पि प्रायशः संभवात् एवं तत्तत्साध्यतावच्छेदकावच्छिन्नव्यभिचारितया हेतुज्ञानस्य हेतुसमानाधिकरणाभाव
प्रतियोगितानवच्छेदकत्वमात्रेण तत्तत्साध्यतावच्छेदकावगाहिव्याप्तिज्ञानाविरोधितया विशिष्टसाध्यतावच्छे
दकानवगाहिव्याप्तिज्ञानस्य हेतुत्वे व्यभिचारस्य हेत्वाभासतानुपपत्तिश्च इति विशिष्टसाध्यतावच्छेदकस्य व्या
प्तिघटकतालाभाय प्रतियोगितानवच्छेदकावच्छिन्नेनेत्यनुक्त्वा प्रतियोगितानवच्छेदको यो धर्मस्तदवच्छिन्ने
नेत्युक्तं यत्र वह्नित्वत्वादिविशेषणावच्छिन्नस्य साध्यतावच्छेदकता तत्र तेन तेन रूपेणैव तत्तद्धर्माणां व्याप्तिघ
टकता यत्र च स्वरूपत एव वह्नित्वाद्यखंडधर्माणां साध्यतावच्छेदकत्वं तत्रापि विशेषणानवच्छिन्नतत्तद्धर्मघ
टितत्तद्धर्मवदितरा वृत्तित्वरूपवह्नित्वत्वादिना तन्निवेशो न तु स्वरूपत एव। अनवच्छेदकत्वरूपविशेषणा राम० ५
पुरस्कारेण भाने निर्विशेषणकभानात्मकस्य स्वरूपतो भानस्यासंभवात् वह्न्यादीतरावृत्तित्वस्य वह्न्यादिमा

त्वद्वृत्तिधर्मान्तरसाधारण्येपि तन्मात्रपुरस्कारेणव्यापकतावच्छेदकत्वग्रहस्यापि वह्नित्वाद्यवच्छिन्नविधेयताकानु
मितिहेतुत्वमुपपद्यते सकलवह्न्यादिवृत्तित्वविषयतानिवेशे गौरवात् सकलवह्न्यादिवृत्तित्वस्य वह्न्यादीत
रवृत्तिसाधारण्यात् यत्तन्मात्रपुरस्कारेणव्यापकतावच्छेदकत्वग्रहस्य न हेतुतासंभवः तथा सति इंधनादिहेतु
तापि वह्नित्वाद्यवच्छिन्नानुमितिप्रसंगात् सकलवह्न्यादिवृत्तिद्रव्यत्वादौ इंधनादिव्यापकतावच्छेदकत्वसत्त्वा
त् वह्नित्वादिनिष्ठतद्व्यक्तित्वधूमजनकतावच्छेदकजातित्वादेर्वह्नित्वादिमात्रवृत्तित्वेपि तेन रूपेण व्या
पकतावच्छेदकत्वग्रहाद्वह्निमानित्याद्यनुमितिरनुभवविरुद्धा येन रूपेणोपस्थिते वह्नित्वादौ इतरसाधा
रण्यसंशयो न जायते तत्पुरस्कारेणव्यापकतावच्छेदकत्वग्रहादेवोक्तानुमितुत्पादानुभवात् अत एव
ज्ञानत्वलानुभवत्वव्यापकगुणत्वव्याप्यजातित्वयोरविशेषेण ज्ञानत्वत्वरूपेणव्यापकतावच्छेदकत्व
ग्रहात् ज्ञानवानयमित्यनुमितिर्न भवितुमर्हतीति दीधितिकारवक्ष्यमाणदूषणमप्युक्तं अधिकमग्रेव

ग० ५

क्ष्यामः तत्तद्व्यक्तिसामानाधिकरण्यंनतत्तद्व्यक्तिगमकताप्रयोजकंपर्वतीयधूमेमहानसीयवह्निसामाना
धिकरण्याग्रहेपिततःपर्वतेलाघवज्ञानादिवशान्महानसीयवह्न्यनुमितेरितिदर्शयतियेनकेनापीति या
वन्निरूपितेत्येताभ्यांतद्रूपविशिष्टस्यतद्धर्मावच्छिन्नयावन्निरूपिताव्याप्तिरिति तद्रूपावच्छिन्ननिष्ठा
तद्धर्मावच्छिन्नयावद्व्यक्तिगमकताप्रयोजिकाव्याप्तिरित्यर्थः यथाश्रुतेएकसाध्यव्यक्तिसामानाधि
करण्यस्यापरव्यक्तिप्रतियोगिकत्वासंभवेनासंगतेः॥ यत्रैकसाध्यतावच्छेदकव्यक्तिर्नसकलहेतुमद्
वृत्तितावच्छेदिकातत्रानुगतरूपावच्छिन्नेनापितेनरूपेणाननतादृशहेतुव्यापकतासंभवः सकलसाध्यता
वच्छेदकव्यक्तीनामेवचालनीन्यायेनहेतुसमानाधिकरणतत्तद्व्यक्त्यवच्छिन्नाभावप्रतियोगितावच्छेद
कत्वादित्याशंकामिष्टापत्त्यापरिहरतितदंश्यादाविति· परंपरासंबद्धमिति· स्वसमवायिसंयोगादिसंबं
धेनसाध्यसंबद्धमित्यर्थः· एतच्चसाध्याद्वृत्तितयादंडत्वादेर्नव्यापकतावच्छेदकत्वसंभवइत्याशंका राम० ५

निराकरणायसाध्यतावच्छेदकं दंडिसंयोगत्वादिरूपतानाधिकरणवृत्तितावच्छेदकावच्छिन्नहेतुव्यापक
तावच्छेदकमित्यर्थः एवकारेणादंडादिरूपसंबंधधर्मव्यवच्छेदः तथाचतत्रप्रतियोगितानवच्छेदकत्वस
हेतुरूपपादत्वेपिनक्षतिः दंडत्वादिनैवप्रकारेणतद्धेतुकदंड्याद्यनुमितिरूपगतत्वात् दंडादौव्याप
कतावच्छेदकत्वभ्रमादेवदंडादिप्रकारकदंड्यनुमितिरूपगमात् स्वाश्रयघटितपरंपरासंबंधेनयत्र
धर्मेव्यापकतावच्छेदकत्वमहत्तद्विशिष्टधर्मिप्रकारेणसामानाधिकरण्यप्रतियोगितयासाध्याव
गाहिव्याप्तिग्रहस्यैववातद्धर्मविशिष्टदंडादिरूपस्वधर्मिणोऽनुमितिविधेयतावच्छेदकताप्रयोजक
त्वोपगमेनदंडिमानित्याद्याकारानुमितेर्भ्रमशून्यतादशायांनिर्वाह्यत्वादितिभावः अथमहान
सीयत्वादिसहितवह्नित्वादिधूमादिमन्निष्ठाभावप्रतियोगितावच्छेदकत्वेपिशुद्धवन्हित्वादिरूपसा
ध्यतावच्छेदकस्यतादृशप्रतियोगितानवच्छेदकत्वसत्त्वान्नादिविशिष्टदंडस्यतादृशप्रतियोगितावच्छे

ग० ६ 6 दकत्वेपि दंडत्वाद्यवच्छिन्नस्य तादृशप्रतियोगितानवच्छेदकतया सुघटतया तस्य व्यापकतावच्छेदकत्वानुप कां२
गमान संगच्छेतेन च तद्दंडीनास्तीति बुद्धेः तन्तोपलक्षितएव दंडे प्रतियोगितावच्छेदकतापर्य्याप्तिर्भासतेन तु त
न्नामंतर्भाव्य तन्तोपलक्षितव्यक्तेरेवानतिप्रसक्ततया तन्नाशस्य अवच्छेदकांतर्भावे गौरवादतो विशेष्यस्याव
च्छेदकत्वपर्य्याप्त्यधिकरणतया दंडत्वविशिष्टस्यापि तस्यानवच्छेदकत्वं दुर्घटं महानसीयवह्न्यभावप्रतियो
गितायावह्नित्वादेरति प्रसक्ततया तन्मात्रेऽवच्छेदकतापर्य्याप्त्यसंभवेन महानसीयत्वादेरवच्छेदकांतर्भा
वस्यावश्यकत्वे इति शुद्धवह्नित्वादेस्तादृशप्रतियोगितानवच्छेदकत्वं सुघटमिति वाच्यं स्वरूपतो भासमा
नस्यैव स्वरूपतोऽवच्छेदकतायाः सिद्धांतसिद्धतया सखंडपदार्थस्य दंडादेः स्वरूपतोऽवच्छेदकत्वासं
भवेन दंडत्वादिविशिष्टस्यातिप्रसक्ततया तन्नादिरूपविशेषणमनंतर्भाव्य तत्रावच्छेदकत्वपर्य्याप्तेरयोगा राम० ९
त् अभावप्रतियोगितावच्छेदकतया भासमाने उपलक्षणीभूतधर्मांतरस्य भानोपगमे तु उपलक्षणतया
दंडत्वमात्रेण तन्न दंडावच्छिन्नाभावप्रतियोगितावच्छेदकतया भासमानं तद्दंडांशे विषयीकृत्य दंडिमति दंडीना

स्तीतिप्रत्ययस्य दुर्वारत्वात् अत्र केचित् उक्तानुशयेनैवेदं यादृशवित्यादिपदोपादानं आदिपदाच्च पृथिवी
त्वादिव्याप्यजातित्वादिना अननुगतीकृतघटत्वपटत्वमृत्तिकात्वपाषाणत्वादिमतः समवायादिना पृथिव्या
दिहेतुकसाध्यस्य परिग्रहः समवायादिना हेतुभूतपृथिव्यादिमति तंतुकपालादौ विशेषणानवच्छिन्नघ
टत्वपटत्वाद्यवच्छिन्नाभावस्य सत्वात् सर्वास्वेव साध्यतावच्छेदकतादृशजातिषु तथाविधाभावप्रति
योगितावच्छेदकत्वपर्याप्तेस्तासां व्यापकतावच्छेदकत्वासंभवेन तदनुगमको धर्मस्यैव परंपरा
संबंधेन तथात्वोपगमस्यावश्यकत्वादित्याहुः अन्ये तु तत्तद्दंडवान्नास्तीत्यादौ प्रतियोगिविशेषणत
याभासमानदंडादिष्वेव प्रतियोगितावच्छेदकत्वपर्याप्तिर्भासिते तद्विशेषणतत्वादौ तु तदवच्छेदक
त्वमेव प्रतियोगितान्यधिकरणस्य तदवच्छेदकत्वासंभवेन तदंतर्भावेन तदवच्छेदकता पर्याप्त्यसं
भवात् न चानवच्छिन्नमवच्छेदकत्वमेव निवेशनीयमिति वाच्यं सखंडसाध्यतावच्छेदकव्यभिचारि

ग० ७ 7

ण्यप्तिप्रसंगात् अनवच्छिन्नमवच्छेदकत्वमेव च स्वरूपतोऽवच्छेदकत्वं तत्त्वरवंडेनास्त्येवातो दंडादेरनवच्छेदक
त्वं दुर्घटं महानसीयवह्निर्नास्तीत्यादौ च महानसीयत्वादेः प्रतियोगिन्येव विशेषणतया भानान्नदंतर्भावे
नैव प्रतियोगितावच्छेदकत्वपर्य्याप्तिरभीप्सिततरेति विशेषः अथ वह्नित्वाद्यंश एव सामानाधिकरण्यसं
बंधेन विशेषणतया महानसीयत्वादिकमवगाह्य मानान्महानसीयत्वविशिष्टवह्नित्ववान्नास्तीत्याद्या
कारिकायाः प्रतीतिस्तस्याः उक्तयुक्त्या वह्नित्वादावेव प्रतियोगितावच्छेदकत्वपर्य्याप्तिविषयकतया व
ह्नित्वादेरपि अनवच्छेदकत्वं दुर्घटमेव स्यात् यदि च वह्नित्वादेः समवायेन प्रतियोगितायां सामानाधि
करण्यसंबंधेन च महानसीयत्वादेस्तदवच्छेदकतायामवच्छेदकत्वे गौरवान्महानसीयत्वादिसहितस
वह्नित्वादेः प्रतियोगितायामेवावच्छेदकत्वं उक्तप्रतीतिस्तु कंबुग्रीवादिमान्नास्तीतिप्रतीतिवदवच्छे
कत्वांशे भ्रमरूपैवेत्युच्यते तदापत्र सामानाधिकरण्यसंबंधेन महानसीयत्वादिविशिष्टस्य वह्नित्वादेः

एम० ७

साध्यतावच्छेदकतातत्स्थलीयव्यभिचारिणिधूमादिहेतावतिव्याप्तिरितिस्वविशिष्टसंबंधिनिष्ठत्वादिना
निर्वाच्यपारिभाषिकमेवावच्छेदकत्वंनिवेशनीयंतच्चतल्लक्षणोपादशस्यस्वपदार्थस्यनिवेशस्तादृश
त्वं॰एवंचमहानसीयत्वादिविशिष्टस्यवह्नित्वादेस्तत्रस्वपदेनोपादानसंभवात्तद्विशिष्टवह्नित्वत्वादि
कमेवपारिभाषिकमवच्छेदकत्वंतदवच्छिन्नभेदश्चाशुद्धवह्नित्वादावपिदुर्घटःतथाचावच्छेदकंयादृशं
स्वंतादृशाविषयकप्रतीतिविषयत्वमेवानवच्छेदकत्वपदेनविवक्षणीयंतथासतिसखंडस्यदंडादेःस्व
रूपतोभानात्तत्त्वादिविशेषणविशिष्टस्यैवावच्छेदकत्वल्लक्षणस्यस्वपदेनोपादेयतयातद्विशिष्टावि
षयकप्रतीतिविषयत्वस्यदंडत्वादिविशिष्टस्यसुघटत्वाद्व्यापकतावच्छेदकत्वमव्याहतमेवेतिचेत्नपारि
भाषिकोस्वत्वघटितत्वेनाननुगतस्याभावकूटज्ञानासंभवेनप्रतियोगितायाःस्वरूपसंबंधरूपावच्छे
दकत्वस्यागत्यागुरुधर्मसाधारण्यमंगीकृत्यव्याप्तिलक्षणेतद्वह्निनिवेशनीयंएवंचसामानाधि
वच्छेदकत्वस्य२ नेर

ग०
८
8

करणयसंबंधेनमहानसीयत्वादिविशेषणावच्छिन्नवह्नित्वादेर्हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकत्वे
पिमहानसीयत्वादिविशिष्टनिरूपितसमवायादेरेवप्रतियोगितावच्छेदकताघटकसंबंधत्वंतत्रोपेय
तेशुद्धसमवायादिनावह्नित्वादेरतिप्रसक्तत्वात् शुद्धसमवायादेस्तैवच्छेदकतावच्छेदकसंबंध ६
त्वेमहानसीयत्वादिसामानाधिकरण्योपलक्षितवह्नित्वाद्यवच्छिन्नाभावात्तद्विशिष्टवह्नित्वाद्य
वच्छिन्नाभावस्यवैलक्षण्यानुपपत्तेश्च तथाचसाध्यतावच्छेदकताघटकशुद्धसमवायादिनाऽखंड
वह्नित्वादेरनवच्छेदकत्वेनदुर्लभंनत्वमहानसीयत्वादिसामानाधिकरण्यस्ययत्रोपलक्षणतातत्रत
स्यावच्छेदककोटौनप्रवेशः यत्रविशेषणत्वंतत्रतत्प्रवेशइत्येववैलक्षण्य मितिवाच्यं उपलक्ष
णीभवन्नतद्रूपावच्छिन्नप्रतियोगितावच्छेदकताकाभावबुद्धावपितत्तद्रूपस्यप्रतियोगितावच्छेदकांशे राम०
प्रकारतयाभानात्तत्राप्यवच्छेदकतावच्छेदकत्वभानस्यावश्यकतयात्रावच्छेदकशरीरप्रवेशारूपो ८

पलक्षणतायात्रपलक्षणाविधयाऽवच्छेदकेतत्रासंभवात् यदुपलक्षितनिरूपितसमवायादेरवच्छे
दकताघटकसंबंधत्वे तस्योपलक्षणतयाऽवच्छेदकत्वंयद्विशिष्टनिरूपितसमवायादेरवच्छेदक
ताघटकसंबंधत्वं तस्यविशेषणाविधयाऽवच्छेदकत्वमित्यस्यैववाविशेषत्वात् एकत्वप्रागभावविशि
शिष्टघटादेः संयोगादिसंबंधेनाभावस्यप्रतियोगितायाअप्रसिद्धतयाविशिष्टनिरूपितसंयोगाद
रवच्छेदकत्वासंभवेनागत्याविशेषणाविधयाप्रतियोगितावच्छेदकत्वस्यान्यथैववैलक्षण्यस्योप
पादनीयतयाशुद्धसमवायादेरवविशिष्टसत्ताद्यभावप्रतियोगितावच्छेदकसंबंधतयातादृशाभा
वस्यतादृशसंबंधेनप्रतियोगिसमानाधिकरणतयादीधितिकृतांप्रतियोगितावच्छेदकविशिष्टासा
मानाधिकरण्यपर्यंतनिवेशव्यावृत्तिसंगतिः माभूद्धाविशिष्टनिरूपितसमवायत्वादिनाप्रतियो
गितावच्छेदकताघटकसंबंधतातथापिमहानसीयत्वादिसामानाधिकरण्योपलक्षितवह्नित्वा

ग० १
9

देस्तद्विशिष्टवह्नित्वादेःस्वप्रतियोगितावच्छेदकतयोर्वैलक्षण्यं आघातद्धर्म्मावच्छिन्नाविशेष्यपर्य्या
सात्त्वं त्वाचविशेष्यविशेषणाभावापन्नयोर्धर्म्मधर्म्मिणोर्द्वयोः पर्य्याप्तेत्येवंरीत्यैवमुपपादनीयं ताव
तापि स्वत्वं दुस्यशुद्धवह्नित्वादेर्हेतुमन्निष्ठाभावप्रतियोगितानवच्छेदकत्वमुपपद्यते धर्म्मांतरोपलक्षि
तवह्नित्वाद्यवच्छिन्नाभावस्यधूमादिमत्यहत्ते विशिष्टवह्नित्वाद्यवच्छिन्नाभावप्रतियोगितावच्छेद
कतायाश्चविशेषणांतर्भावेनैवपर्य्याप्तेः तन्नोपलक्षितदंडावच्छिन्नप्रतियोगिताके हेतुमन्निष्ठा
भावप्रतियोगितावच्छेदकताचतत्रावच्छिन्नाशुद्धविशेष्यएवपर्य्याप्तासाध्यतावच्छेदके शुद्धसंयो
गसंबंधावच्छिन्नाचेतितादृशसंबंधेनदंडादेस्तादृशाभावप्रतियोगितानवच्छेदकत्वंदुरुपपादमि
तिसामंजस्यमितिवदंति वस्तुतोगुरुधर्म्मस्यप्रतियोगितानवच्छेदकत्वेपारिभाषिकावच्छेदकत्वंनि एम० १
वेशनीयं तच्छरीरेयादृशं स्वनिविष्टतादृशधर्मभेदनिवेशेपिवह्नित्वादौविशिष्टवन्हित्वादिभेदासत्त्वेन

कतोघट५

तादृशातादृशधर्म्माविषयकप्रतीतिविषयत्वं निवेशनीयमितिगौरवमतःप्रतियोगितावच्छेदकंयादृश
यादृशरूपंस्वविशिष्टसंबंधिनिष्ठाभावप्रतियोगितावच्छेदकतत्कत्वरूपंतत्वदतिरिक्तवृत्तित्वमे
वानवच्छेदकंतेनविवक्षणीयंतथाचसर्वीसामेवदंडादिव्यक्तीनांहेतुसमानाधिकरणाभाव
प्रतियोगितावच्छेदकतयाकस्याश्चिदपिदंडादिव्यक्तेनयावत्प्रतियोगितावच्छेदकातिरिक्तवृ
त्तित्वंस्वस्यस्वातिरिक्तवृत्तित्वविरहादित्यखंडधर्म्मस्यव्यापकतावच्छेदकत्वानुसरणं
एतच्चैकोक्त्याभिमायेणयथाश्रुतमूललक्षणमुपपादयितुंसार्व भौमप्रभृतिमतमनुसृ
त्य एकोक्तमनादरेच्चनुगतरूपेणनानाव्यक्तिविधे यतावच्छेदककानुमित्यौपयिकव्याप्तिप
द्रूपावच्छिन्नमनवच्छेदकंयद्रूपंवाअवच्छेदकतानवच्छेदकंतद्रूपविशिष्टावच्छिन्नसा
मानाधिकरण्यंतद्रूपविशिष्टावच्छिन्ननिरूपिताव्याप्तिरित्येवरीत्यानिर्वचनीयातथासतिदंडि

ग० १० 10

संयोगादिहेतुकापि दंडिमानयमित्याकारकानुमितिविशेषदर्शिनामपि निर्वहति एवमेकोक्ताप्रतियो
गिताधर्मिकोभयाभावघटितायाग्रंथकारेणास्वयमुपदर्शनीयायाव्याप्तेरपि दंडत्वादिविशिष्टदंडाद्यव
च्छिन्ननिरूपितत्वनिर्वाहः हेतुसमानाधिकरणविशेषाभावप्रतियोगितायां दंडत्वपृथिवीत्वव्याप्यजा
तित्वादिविशिष्टावच्छेद्यत्वाभावस्याव्याहतत्वात् दंडत्वादिसामान्याभावप्रतियोगितायामेव तद्धर्मवि
शिष्टनिरूपितविलक्षणावच्छेद्यत्वसत्त्वादिति ध्येयं॥ ॥इत्थं चेति हेतुतावच्छेदकोपलक्षितहेतु
सामानाधिकरण्यसाधारणरूपमुपेक्ष्य विशिष्टसामानाधिकरण्यत्वेन सामानाधिकरण्यनिवेश
नेन चेत्यर्थः नाव्याप्तिरिति न विशिष्टसत्तात्वरूपहेतुतावच्छेदकविशिष्टवैशिष्ट्यावगाहिज्ञानजन्या
नुमित्योपपिकव्याप्त्यनिर्वाह इत्यर्थः तेन विशिष्टसत्तात्वोपलक्षितहेतुमत्ताज्ञानजन्यानुमित्योपपि
कव्याप्तौ तु उपलक्षितहेतुसामानाधिकरण्यं निवेश्यते अतो द्रव्यत्वाद्यभाववतादृशहेतुसामानाधि

राम० १०

करणायसत्वात्ताहृशेहेतौनद्रव्यत्वादेर्व्याप्तिरित्यभ्रांतानांगुणादौविशिष्टसत्तात्वाद्युपलक्षितहेतुमत्ता
ज्ञानसंभवात्तत्रनद्रव्यत्वाद्यनुमित्यापत्तिः यत्रघटपटवृत्तिसंयोगत्वादिनाहेतुताघटपटाद्यन्यतर
त्वंसाध्यंतत्रोभयवृत्तित्वविशिष्टाधिकरणाप्रसिद्ध्याहेतुतावच्छेदकोपलक्षितहेतुसामानाधिकर
ण्यगर्भव्याप्त्यंतरंस्वीकरणीयं अन्यथातद्धेतुकतत्साध्यकानुमित्युच्छेदप्रसंगः ईदृशव्याप्त्यंतरानभ्यु
पगमेसादृश्यहेतुकानुमितिरप्युच्छिद्येततम्देदसामानाधिकरण्यसहिततद्वृत्तित्वरूपसादृश्यत्ववि
विशिष्टाधिकरणाप्रसिद्ध्याविशिष्टाधिकरणतागर्भव्याप्त्यसंभवात् अथैवंविशिष्टवैशिष्ट्यावगा
हिज्ञानेविशिष्टनिरूपितसमवायस्यसंबंधत यातेनसंबंधेनव्याप्तिर्हेतुतावच्छेदकसंबंधेनहेतु म
त्वस्याग्रेविवक्षणीयतयैवनिर्वहतीतिकथमत्रविशिष्टपदोपादानं नचविशिष्टवैशिष्ट्यवोधेवि
शिष्टनिरूपितसमवायादिरुक्तविशेषणतावच्छेदकसंबंधइतिमताभिप्रायेणेदंतथाचोक्तस्य

यत्सादिनानविशेषणसंबंधता· अपितुशुद्धएवसमवायादिर्विशेषणसंबंधः स्वविशिष्टनिरूपितसमवा १

त्वेपिहेतुतावच्छेदकसंबंधः शुद्धसमवायएवेतिहेतुतावच्छेदकसंबंधमात्रविवक्षयानप्रतीकारइतिवा
च्यं हेतुतावच्छेदकविशिष्टवैशिष्ट्यावगाहिज्ञानेहेतुतावच्छेदकस्यपक्षेपरंपरासंबंधभाननि
यमेव्यापकताशरीरघटकाभावाधिकरणेपितद्दीयताहृयातादृशसंबंधस्यनिवेशितत्वात्तत्तए
वहेतुतःपक्षेसाध्यानुमितिनिर्वाहेविशिष्टसत्त्वात्वेनसत्तादेर्द्रव्यत्वादिव्याप्तीस्वीकारस्यनिरर्थक
तापातात् नचदर्शितरीत्याविशिष्टव्यापकताग्रहस्यविशेषणव्यापकतावगाहित्वेपिविशिष्टपक्ष
धर्मताग्रहस्यविशेषणेतदवगाहित्वेपिचविशिष्टहेतुकपरामर्शस्यविशेषणेसाध्यसामाना
धिकरण्यावगाहित्वानियमान्नविशेषणहेतुकामितिसामग्र्याविशिष्टहेतुकानुमितिपूर्वभाव
श्यकतेतिवाच्यं साध्येविशिष्टहेतोर्व्यापकताग्रहेपिविशिष्टहेतौसाध्यविरोधग्रहसत्वेअनुमि
त्यनुत्पत्त्याविशिष्टहेतुकस्थलेविशिष्टाधिकरणत्वघटितहेतुसाध्यसामानाधिकरण्यविषयक

स्यैवपरामर्शस्यानुमितिहेतुतायावाच्यत्वात् अन्यथाविरोधस्यजनकज्ञानाविरोधितयाहेत्वाभासत्वस्यदुर्घ
टताप्रसंगात्परंपरासंबंधस्यापितन्मानेनियमेनविशिष्टहेतुकपरामर्शस्यनियमतोविशेषणेपिसा
ध्यसामानाधिकरण्यावगाहित्वात् मेवंविशिष्टनिरूपितव्यापकताशरीरेविशेषणस्यधर्मितयारतं
त्र्येणैवविशिष्टाधिकरणविशेषणतयाप्रवेशोनतुस्वातंत्र्येण तथाचतदग्रहेनविशेषणव्यापकता
वगाहित्वनियमोनिर्वहतिविशेषणनिरूपितव्यापकतायास्तद्वन्निष्ठाभावप्रतियोगितावच्छेदकत्वत
पर्य्याप्तप्रतियोगितावच्छेदकताकाभावघटितत्वात् विशिष्टवन्निष्ठाभावप्रतियोगितावच्छेदकत्वरू
पप्रतियोग्युपरागेणाभावभानेचविशिष्टवत्त्वं तद्गतविशिष्टवत्त्वपरित्यागेनविशेषणवन्निष्ठाभाव
प्रतियोगितावच्छेदकत्वत्वेप्रतियोगितावच्छेदकत्वपर्य्याप्तिभानासंभवात् अभावप्रतियोगिप्रकारघ
टकस्यउपलक्षणतयाभानानुपगमात् नचपरंपरासंबंधेनविशेषणनिष्ठव्याप्यवगाहिपरामर्शनि

ग०
१२
12

ष्टकारणतापाउभयवादिसिद्धत्वात्विशिष्टहेतुकपरामर्शेतरकारणत्वाकल्पनप्रयुक्तलाघवानुरोधेनविशिष्ट
स्यव्याप्तिग्रहस्थले अधिकरणे स्वातंत्र्येणविशेषणावत्त्वभानमुपगम्यविशेषणेपिव्याप्तिभानंकल्पनीयम
तिवाच्यं शब्दाधीनविशिष्टवत्वगर्भव्याप्तिग्रहेस्वातंत्र्येणविशेषणगर्भव्याप्तिभानानियमात् तादृश
व्याप्तिबोधकशब्दस्यस्वातंत्र्येणविशेषणावत्त्वाभासकत्वात् अथतत्रतदुत्तरंविशेषणेमानसव्या
प्तिभानानियमात् तादृशव्याप्तिबोधकशब्दस्यस्थाग्रहएवानुमित्यर्थंकल्प्यतेनकारणतायाःक्लृ
प्तत्वादितिचेन्न एवंसतिदंडाद्युपलक्षितधर्मिहेतुकानुमितेर्विलयप्रसंगात् तद्धेतुकव्याप्तिग्र
हस्थलेपरंपरासंबंधेनोपस्थितदंडादौ व्याप्तिग्रहस्यकल्पनसंभवात् स्वातंत्र्येणसकल
परंपरासंबंधघटितसकलविशेषणावत्वग्रहस्याप्रामाणिकतयाविशेषणहेतुकपराम राम०
र्शस्यकारणतायाः क्लृप्तत्वानियमाच्चनतुवन्हिसंयोगिसंयोगाद्यात्मकसाध्यसामानाधि १२

करण्यस्य व्याप्तित्वे एकै वह्निसां व्याप्तिरिति मूलग्रंथविरोधः महानसपर्वतादिनिष्ठधूमादिगतवह्निसंयोगिसंयोगा
देरैक्यासंभवात् इत्यत आह सामानाधिकरण्यव्यक्तीनामिति भेदेपीति अधिकरणभेदेनेत्यादिनिरूपकता
वच्छेदकं वन्हित्वादिरूपसाध्यतावच्छेदकं धूमत्वादिरूपहेतुतावच्छेदकं तदेवात् साध्यहेतुभेदेप्यभे
दात् तदभेदतात्पर्येणैकं भाक्तैकम् + अधिकरणतावच्छेदकं + व्यवहारः न तुल्यक्षणयात व्यवहारसम
र्थनमसंगतं सामान्यप्रत्यासत्त्यभावपक्षे विशिष्टपरामर्शनिर्वाहार्थं व्याप्तैक्यकथनात् तन्निर्वाहस्य च
सामानाधिकरण्यस्य व्याप्तित्वे धूमत्वादेरैक्येऽपि पक्षीयधूमादिनिष्ठसामानाधिकरण्यस्य सामान्य
प्रत्यासत्तिं विना पूर्वं ग्रहासंभवेन तत्स्मरणासंभवात् पक्षीयधूमे तद्रूपतयासंभवेनायोगात् अतोऽ
तिप्रसंगेन च धूमादिव्यापकवह्न्यादिसामानाधिकरण्यमात्रस्य व्याप्तित्वासंभवात् धूमत्वादिरू
पहेतुतावच्छेदकस्य द्विधा व्याप्तिशरीरप्रवेशस्यावश्यकत्वं प्रदर्शयन् व्याप्तेर्भेदमभेदमभेदं च दर्शि

ग० १३ 13

यति वस्तुतस्त्वित्यादिना प्रथमपक्षप्रदर्शनं तत्पक्षे धूमत्ववाद्यप्रवेशाल्लाघवेन सामान्यप्रत्यासत्तिपक्षेत
ज्ज्ञानस्यैवानुमितिहेतुत्वमिति सूचनाय रासभादिसाधारण्यादिति तत्साधारण्ये च भ्रमे विनापि रासभा
दिलिंगकवह्न्याद्यनुमानापत्तिरिति भावः अथ व्यापकताप्रविष्टहेतुतावच्छेदकधर्मितावच्छेदककसा
मानाधिकरण्यप्रकारकज्ञानस्यैवानुमितिहेतुत्वोपगमान्नायमतिप्रसंगः धूमत्वादिप्रकारेणाभासमा
नेरासभादौ साध्यसामानाधिकरण्यग्रहस्य धूमत्वाद्यंशे भ्रमत्वनियमात् वक्ष्यमाणधूमत्वादिमन्नि
ष्ठवह्न्यादिसामानाधिकरण्यस्य व्याप्तित्वेपि तद्धर्मितावच्छेदकतापन्नहेतुतावच्छेदकविशिष्टवत्ताज्ञानस्य
हेतुतायाश्चावश्योपेयत्वात् अन्यथा विशिष्टसत्तादिव्यापके द्रव्यत्वादिनिरूपितविशिष्टसत्तादिनिष्ठसा
मानाधिकरण्योपलक्षितवत्ताज्ञानाद्गुणरूपपक्षेऽभ्रान्तस्य द्रव्यत्वाद्यनुमानापत्तेः साध्यसामानाधि गम० १३
करण्यविशिष्टवत्त्वस्य पक्षे साध्यनिश्चयं विना दुर्निश्चेयतया तदुपलक्षितवत्तानिश्चयस्याप्यनुमिति

हेतुतायाउपगंतव्यत्वात् केवलसामानाधिकरण्यप्रकारेणपक्षधर्मताज्ञानस्यानुमितिहेतुत्वे धूमाभाव
वान्पक्ष इत्यसिद्धिग्रहदशायामपिसाध्येधूमादिव्यापकताज्ञानादनुमित्यापत्तेश्च असमानप्रकारकतया
धूमाभाववान् पक्ष इत्यादिबुद्धेर्धूमवद्वृत्तिसामानाधिकरण्यवह्न्यान्पक्ष इत्यादिज्ञानाविरोधित्वादि
तिचेन्न सत्यंधूमवत्वादिमति सामानाधिकरण्यमित्यस्यधूमवत्वादिविशिष्टविशेषणता पन्नं सामा
नाधिकरण्यमित्यर्थः नतुधूमादिवृत्तित्वविशेषितंसामानाधिकरण्यमिति तथाच एकधर्मिविशेषणा
तापन्नधूमवत्वादिरूपहेतुतावच्छेदकसामानाधिकरण्योभयं व्याप्तिरितिपर्य्यवसितं कारणं च धू
मव्यापकेवह्निसमानाधिकरणधूमवान्पर्वत इत्यादिरेव परामर्शः तावतैवोक्तोभयस्य हेतुविशेष
णतयाऽनुमितिजनकज्ञानविषयत्वरूपव्याप्तित्वनिर्वाहः द्वितीयपक्षेच धूम व्यापकवह्निसमा
नाधिकरणवृत्तिधूमत्ववद्धूमवान्पर्वत इतिज्ञानंहेतुः नतुस्वरूपतो धूमत्वप्रकारकं तादृशधूमत्व

ग० १४ 14 वह्न्यान्नपक्षइत्याकारकं तादृशज्ञानस्यधूमाभाववान्नपक्षइत्याकारकासिद्धिज्ञानांप्रतिबध्यत्वात्
एतन्मतेचहेतुतावच्छेदकवृत्तसाधारणधर्मावच्छिन्नेसाध्यसमानाधिकरणावृत्तित्वमेवविरोधः ननु
हेतुतावच्छेदकावच्छिन्नेसाध्यासामानाधिकरण्यं उपदर्शितज्ञानस्यहेतुतावच्छेदकंधर्मितावच्छेदकी
कृत्यसाध्यसामानाधिकरण्यानवगाहितयातथाविधविरोधज्ञानाप्रतिबध्यत्वात् यदिचविरोधस्यानु
मितिप्रतिसाक्षाद्विरोधितयाहेत्वाभासत्वमुपपादयितुंशक्यतेतदासमानाधिकरणावृत्तित्वांशनि
धर्मितावच्छेदकंसमानाधिकरणावृत्तिमद्धूमवान्पर्वतइत्येतादृशमपिज्ञानंहेतुरूपेयते अन्य
थाधूमत्वत्वादिविषयतायाःकारणतावच्छेदककुक्षौप्रवेशेगौरवात् सामानाधिकरण्यप्रकार
कत्वापेक्षयासमानाधिकरणावृत्तिप्रकारकत्वस्यगुरुत्वेपिसामान्यस्याभत्यासतित्वेविशिष्टपराम
र्शनिर्वाहानुरोधेनतेनरूपेणहेतुतायाआगत्योपगमात् आद्याहेतुतावच्छेदकधर्मसहितसाध्य राम० १५

सामानाधिकरण्यरूपाभिन्नेति प्रतिधूमादिकमित्यादिः द्वितीयासाध्यसमानाधिकरणावृ
त्तिहेतुतावच्छेदकरूपा अभिन्नासर्वधूमादिसाधारणी अनुगतरूपावच्छिन्ननाना
व्यक्तिदंडादिविशिष्टहेतुकस्थलेपि परंपरासंबंधेन दंडत्वाद्यखंडधर्मएवहेतुतावच्छेदक
त्वमुपगंतव्यमितिभावः यद्यपि साध्यसामानाधिकरण्यावच्छेदकरूपवक्ष्यमाणव्याप्त्यभिप्रा
येणापि एकैवहीत्यादिग्रंथः संगच्छते तथापित्वयंतत्र स्वरूपसंबंधरूपावच्छेदकत्व प्र
वेशस्यखंडनीयतयास्वविशिष्टाधिकरणावृत्तियावत्साध्यासमानाधिकरणकत्वरूपपा
रिभाषिकावच्छेदकत्वस्यैव चविवक्षणीयतयैतदपेक्षयातादृशी व्याप्तिगुरुशरीरेतिकथं
चिदीदृशव्याप्तेरैक्योपपत्तिसंभवेनतज्ज्ञानमनुमितिहेतुरित्येतादृशव्याप्तेरैक्यमुपपा
दितं। ॥मिश्रादिमतमवलंब्यप्रतियोग्यसमानाधिकरणपदप्रयोजनमाह अयंकपि

संयोगीति अथैतद्वृक्षत्वादेरव्याप्यवृत्तिकपिसंयोगादिव्याप्यतोपगमे कपिसंयोगाद्यवच्छे
दकमूलादेः पक्षतावच्छेदकत्वे तदवच्छेदेनापि एतद्वृक्षादौ कपिसंयोगादेः सिद्धिप्रसंगः न चे
ष्टापत्तिः सल्लिंगपरामर्शस्य भ्रमानुमित्यजनकत्वनियमात् न च तदवच्छेदेन हेतुमत्ताज्ञान
स्य तदवच्छेदेन साध्यानुमितिहेतुत्वादेतद्वृक्षत्वादिरूपव्याप्यवृत्तिहेतोश्च किंचिदवच्छेदेनावृ
त्तेर्नातिप्रसंग इति वाच्यं यदि स्वरूपसंबंधरूपावच्छेदकत्वावगाहिन्यामनुमितावपि तादृशहे
तुमत्ताज्ञानत्वेन हेतुत्वमुपेयते तदापि तुल्ययुक्त्या एतद्वृक्षत्वादेरिव मूलाद्यवच्छिन्नसंयोगादि
विशेषस्यापि कपिसंयोगादिव्याप्यतया तेन हेतुना मूलाद्यवच्छेदेन कपिसंयोगाद्यनुमितेर्निष्प्र
त्यूहत्वादिति चेत् अत्रोपाध्यायाः साध्यस्य पक्षतावच्छेदकसामानाधिकरण्यं विना व्याप्यस्य
पक्षधर्मत्वमनुपपन्नमिति पक्षधर्मताबलात् पक्षतावच्छेदकसामानाधिकरण्येनैव साध्यसिद्ध

त्तिनतुतदवच्छेद्यत्वमपि॰ प्रमाणाभावादित्तिनाहेत्यानुमितेरप्रामाणिकतयातत्रपरामर्शहेतुताकल्पनमेव
नास्तीतिनतदापत्तिरितितमाद्यधिरेमिश्राद्यत्कवाधानवतारमूलाघवच्छेदेनकपिसंयोगादिसिद्धिरित्येम
तंदूषयितुमुपन्यस्यति यत्त्वितितन्न असमानाधिकरणंतं ननुद्रव्येसंयोगत्वावच्छिन्नाभावसत्वएवाव
च्छेदकगर्भोक्तिलक्षणाव्याप्तिः प्रसज्येतेतदेवविरोधात॰ वृक्षादौचसंयोगानवच्छेदकभागाप्रसिद्धा
तत्सामान्याभावावच्छेदकस्यदुर्लभत्वादित्यतआह संयोगस्येतिवृक्षत्वावच्छेदेनेति वृक्षत्वादेः
प्रत्येकंसकलसंयोगस्यातिप्रसक्तत्वात्तस्यसंयोगावच्छेदकत्वासंभवात आकाशादिसंयोगस्यापि
यावद्वृक्षवृत्तेरेकस्याभावाद्वृक्षत्वेनतत्संयोगानतिप्रसक्तत्वासंभवादितिभावः ननुवृक्षत्वाद्यवच्छेदेनवृ
क्षादौसंयोगसामान्याभावसत्वेवृक्षेसंयोगोनास्तीत्यादिप्रत्यक्षापत्तिरित्यतआह तत्रचेति अतीन्द्रि
यस्येति अतीन्द्रियप्रतियोगिकतयासंयोगसामान्याभावस्यातीन्द्रियत्वमितिभावः समान्याभावप्रत्य

ग० १६ 16

क्षेयावर्त्तीतियोग्यत्वस्यतंत्रत्वादितिभावः प्रतियोगितावच्छेदकयोग्यत्वस्यतंत्रत्वेत्वाह· परितइति· ननुसंयोगसा
मान्याभावस्यवृक्षेसत्वेमहत्वोद्भूतरूपवन्मात्रसमवेतसंयोगसामान्याभावोप्यावश्यकः तद्व्यापकधर्मावच्छि
न्नाभावस्यतद्धर्मावच्छिन्नाभावनियतत्वादितियोग्यमात्रप्रतियोगिकोपमभावः कथंनसाक्षात्क्रियतेइ
त्यतआह परितइति प्रतियोग्युपलब्धेर्विभिन्नावच्छेदेनाभावग्रहेप्रतिविरोधित्वानमुद्रयाप्रतिबंधकंन
संभवतीति तस्यदोषत्वकथनंदोषविधयाप्रतिबंधकत्वलाभाय अथपत्रसंयोगाविषयकसेवोपनीतभा
नाद्यात्मकंवृक्षादिरूपाधिकरणज्ञानंतदग्रिमक्षणेवृक्षादौताहशसंयोगसामान्याभावग्रहप्रसंगः ता
दृशदोषस्यप्रागसत्वात् एवंवृक्षेनसंयोगइत्यादिलौकिकप्रत्यक्षस्यालीकतयातत्रतादृशदोषस्यप्रति
बंधकत्वनमेवाशक्यमितिचेन्न· वृक्षादौसंयोगसामान्याभावलौकिकप्रत्यक्षस्याप्रसिद्धत्वेपिगुणादौ एम० १६
तत्प्रसिध्याअधिकरणीयविषयतासंबंधेनसंयोगाभावलौकिकप्रत्यक्षत्वावच्छिन्नंप्रतिस्वविषयसंयोग

वत्वसंवंधेन प्रत्यक्षत्वेन प्रतिवंधकत्वकल्पनात्सर्वत्र द्रव्येंतत संयोगविषयकेश्वरीयप्रत्यक्षसर्वदातादृश
संवंधेन सत्वेनातिप्रसंगविरहात् इदमायाततः द्रव्यरूपाधिकरणविषयकसंयोगाभावविषयकप्रत्यक्षस्य
कदाचिदप्यनुदयेन तादृशप्रत्यक्षसमाख्याएवाकल्पनेनापादकाभावादेवातिप्रसंगवारणसंभवे तादृ
शप्रतिवंधकताकल्पनस्यायुक्तत्वात् कथंचिदापत्तिसंभवेपि तादात्म्यसंवंधेन द्रव्यत्वेनैव तादृशसंवंधे
नसंयोगाभावलौकिकप्रत्यक्षंप्रतिप्रतिवंधकत्वौचित्यात् मानाभावादिति लौकिकप्रत्यक्षस्ययोग्यानु
पलब्धिविरहेणासंभवादुपनीतभानस्य संयोगाभावो वृक्षावृत्तिरित्याकारकस्य विपरीतविषयकस्यापु
पतयवशेन संभवाद्धि निगमनाविरहेण एकतरस्य प्रामाण्यासिद्धेः शाब्दस्याप्तोक्तत्वासिध्यातस्यवस्था
पकत्वात् अनुमानस्य च लिंगाभावेनासंभवादिति भावः ननुवृक्षादौयावत्संयोगविशेषाभावानामु
भयसिद्धतयातत एव हेतोस्तत्राप्रत्यक्षस्यापितत्सामान्याभावस्यासिद्धिर्निष्प्रत्यूहैवेतिशंकांनिरस्यति

ग० नचेत्यादिना यः संयोगी ययावच्छिन्नशेषाभाववान्स संयोगसामान्याभाववानिति व्याप्तेरन्यव्यर्थविशेषणप्रयोज
१७ कत्वादिदोषेण निराकरणीयतया प्रथमतः सामान्यमुखी व्याप्तिमनुमानोपष्टंभकतयाऽऽदर्शयति योपदीपे
17 ति यद्धर्माश्रयस्य यावच्छिन्नशेषाभाववान् यः स तद्धर्मावच्छिन्नाभाववानित्यर्थः संयोगत्वाश्रयस्य विशेष
धर्मावच्छिन्नाभावकूटं ह्यक्षादौ वर्त्तत इति तत्रोक्तव्याप्तेः संयोगत्वावच्छिन्नाभावसिद्धिः प्रतियोगिनो यत्व
तत्वेन निवेशे संयोगेहन्त्रिकपि संयोगत्वादिरूपसामान्यधर्म्मावच्छिन्नाभावमादाय सिद्धसाधनं स्यादि
ति धर्मस्य यत्वतत्वेनोपादानं संयोगादिसंबंधावच्छिन्नसंयोगत्वाद्यवच्छिन्नाभावमादाय सिद्धसाधनवारणा
य समवायसंबंधावच्छिन्नाभाव एव साधनीयः अन्यसंबंधावच्छिन्नविशेषाभावकूटस्य तत्संबंधावच्छिन्ना
भावव्यभिचारित्वे समवायसंबंधावच्छिन्नविशेषाभावकूटस्यापि तत्संबंधावच्छिन्नसामान्याभावव्यभि एम०
चारित्वं तुल्यन्यायेन संभाव्येतेति प्रतियोगितावच्छेदकसंबंधानामपि यत्वतत्वेन व्याप्त्यावंतर्भावः अतएव १७

वसमवायसंवंधावछिन्नपावछिन्नशेषाभावे हेतुमानतत संबंधावछिन्नसंयोगसामान्याभावसिद्धिः तद्धर्माश्रयवि
शेषाभाववतउभयावृत्तितद्धर्मसमानाधिकरणधर्मावछिन्नाभावः अतः संयोगत्वाद्यपेक्षयावृक्षवृत्तिसं
योगत्वादेर्विशेषधर्मत्वेपि संयोगसामान्याभावं वृक्षादावनभ्युपगच्छतां अवयवविशेषरूपावच्छेदकदुर्नि
क्षेयात्वृक्षवृत्तिसंयोगत्वाद्यवछिन्नाभावस्य वृक्षादावनभ्युपगमेपि च न संदिग्धासिद्धिः वृक्षवृत्तिसंयोगा
त्वादीनामुभयवृत्तित्वेन तदवछिन्नाभावव्यावृत्तेः नचैहेतावुभयावृत्तित्वविशेषणस्यासिद्धिवारकत्वेपि
व्यभिचारकतयावैयर्थ्यं यावत्त्वविशेषस्य धीविशेषविषयत्वरूपस्य परिचायकमेव तादृशधर्मावछि
न्नप्रतियोगिताकत्वं न तु हेतुप्रविष्टमिति तु न सत् तथा सति पत्र पदार्थस्य हेतुशरीराप्रवेशेन सामान्यव्या
प्तित्वानुपपत्तेरिति व्याच्यं यावत्पदस्य व्यापकत्वार्थकतया तद्धर्मसमानाधिकरणोभयावृत्तिधर्मा
वछिन्नाभावत्वनिरूपितायाआधेयत्वसंबंधावछिन्नव्यापकतायाएव हेतुतयाविशेषधर्मव्यापक

ग० १८
18

त्वाघटकाभावांतस्यैवच सामान्यधर्मेव्यापकताघटकतयावैयर्थ्यो नवकाशात् नच ताहृशाभावत्वव्या
पकत्वं ताहृशाभावनिष्ठभेदप्रतियोगितायां आधेयतासंबंधेनानवच्छेदकत्वं एवंच संयोगविशेषाभावा
नां सर्वेषामेव सर्वाधिकरणवृत्तितया तन्निष्ठभेदप्रतियोगितायामाधेयतासंबंधेनावच्छेदकमधिकरण
मप्रसिद्धमिति तदनवच्छेदकत्वरूपहेतुप्रसिद्धिरिति वाच्यं आधेयत्वसंबंधावच्छिन्नावच्छेदकतासं
बंधेन प्रतियोगिताऽभावस्यैव प्रतियोगितानवच्छेदकत्वस्थाने निवेशनीयत्वात् उक्तस्थले व्यधि
करणताहृशसंबंधावच्छिन्नाभावप्रसिद्धिसत्वात् यद्धर्म्मसमानाधिकरणात्यंतप्रतियोगितावच्छेदक
त्वेन धर्म्मो विशेषणीयः तेन कंबुग्रीवादिमत्वादिव्याप्यधर्म्मावच्छिन्नप्रतियोगिताकयावदभाववत्त
स्तद्धर्म्मावच्छिन्नाभावाप्रसिद्ध्या ताहृशाभाववत्वासंभवेपि न क्षतिः नच भेदप्रतियोगितावच्छेदकत्वा राम० १८
च्चत्वघटाद्यन्यतरत्वादिव्याप्यधर्मावच्छिन्नसंयोगादिसंबंधावच्छिन्नप्रतियोगिताकयावदभावव

नरत्तद्रूपावच्छिन्नतत्संबंधावच्छिन्नप्रतियोगिताकाभाववत्वासंभवाद्व्यभिचारः वाच्यत्वादेः संयोगादि
व्याप्यवृत्तित्वात्तेन संबंधेन घटादेरेव नाहृशाभावविरोधितया घटत्वादेरेव तत् प्रतियोगितावच्छेदकत्वसंभ
वेन गुरोरन्यतरत्वस्य तत् प्रतियोगितानवच्छेदकत्वादिति वाच्यं वाच्यत्वादिसाधारणस्यान्यतरं निष्ठ
प्रतियोगित्वस्यान्यूनवृत्तित्वघटितत्वादिना ऽवच्छेदासंभवदगत्या गुरुणाप्यन्यतरत्वादिनैव तदवच्छेदात्
वस्तुतोपत्संबंधावच्छिन्नप्रतियोगिताकाभावस्य साध्यहेतुघटकताततत्संबंधावच्छिन्नप्रतियोगितावच्छे
दकत्वेनैव सामान्यधर्मस्य विशेषणीपतया ऽत्र सामान्यधर्मस्य भेदप्रतियोगितावच्छेदकत्वेपि
संयोगादिसंबंधावच्छिन्नप्रतियोगितानवच्छेदकतया तत्संबंधावच्छिन्नतदवच्छिन्नाभावाप्रसिद्ध्या
वपि तत्व्यभिचारः अतएव भेदप्रतियोगितावच्छेदकजातित्वादिघटकनित्यत्वादेः समवायसंबं
धावच्छिन्नप्रतियोगितावच्छेदकगर्भे निवेशस्य गौरवेणासंभवेपि न जातित्वादिसामान्यधर्म

घटितहेतोर्व्यभिचारितया सामान्यव्याप्तिभंगः वस्तुतस्तु यद्धर्मप्रतियोगितावच्छेदकत्वविशेषणाम
नुपादेयमेव कंबुग्रीवादिमत्त्वसमानाधिकरणोभयावृत्तिधर्मावच्छिन्नाभावनिष्ठभेदप्रतियोगि
तात्वस्य घटत्वादिघटिततादृशधर्मापेक्षया गुरुतया तदवच्छिन्नाभावरूपव्यापकत्वाप्रसिद्धेर्यद्धर्मरू
त्वेनेन कंबुग्रीवादिमत्त्वरूपगुरुधर्मोपादानस्य गुरुधर्मस्याभावप्रतियोगितानवच्छेदकत्वपक्षेऽसं
भवेन व्यभिचारानवकाशात् अभावे यावत्त्वविशेषणाप्रवेशात् यत्किंचिज्जात्यादिव्यक्त्यभावव
तिजात्यादिसामान्याभावासत्त्वेपि न सामान्यव्याप्तिभंगः यद्यपि पन्नदर्थघटितसाध्ये हेतूनाम
नतुगमेन नैकाव्याप्तिरिति संयोगसामान्याभाववत्तदीयविशेषाभावकूटयोर्व्याप्तौ यावत्त्वादिविशे
षणवैयर्थ्यमेव तथापि प्रकृतदोषस्य स्वपमग्रेवाच्यतया यथाकथंचित्त्वं का संगतिः अथ वृक्षादौ या
वत्संयोगाभाववत्त्वमुभयवाघस्तिद्धं तत्र विभुसंयोगाभावावच्छेदकस्योवपव विशेषस्यादिग्विशे

षस्यवा दुर्वचत्वात् ध्वंसप्रागभावयोरत्यंताभावविरोधित्वे कालविशेषावच्छेदेनापि तत्र तदभावात् त
योस्तद्विरोधितामते द्रव्यसंयोगसामान्याभावस्याप्युत्पत्तिकालावच्छेदेन द्रव्येव विरोधात् नच मूला
द्यवच्छिन्नविभुसंयोगव्यक्तीनां भेदादग्रमूलाद्यवच्छेदेनाभावः सुलभ इति वाच्यं तासां भेदस्याप्रा
माणिकत्वात् नच नानावयवावच्छिन्नसंयोगव्यक्तीनामभेदे तत्तत्संयोगव्यक्तौ तत्तदवच्छेदकव्यक्ती
नां तादात्म्यसंबंधेन कारणतायां व्यभिचार इत्यवच्छेदकभेदेन संयोगभेद आवश्यकः आवश्यक
श्चावच्छेदकव्यक्तीनां विशिष्य स्वावच्छिन्नसंयोगव्यक्तिषु हेतुताभ्युपगमः अन्यथा मूलादिमात्राव
च्छिन्नमूर्तांतरसंयोगानामग्राद्यवच्छेदेन तद्वृक्षादिवृत्तिविभुसंयोगानां च वृक्षांतरावयवावच्छेदेनानुत्प
त्तिप्रयोजकस्य दुर्लभत्वापातादिक्षांतरावच्छेदेनेति वाच्यं व्याप्यवृत्तेरवच्छेदकानभ्युपगमेन वृक्षा
दौ विभुसंयोगस्य व्याप्यवृत्तितया मूलाद्यवच्छिन्नत्वविरहेण तत्र मूलादीनां हेतुताविरहात् व्या

ग॰ २०

20

यत्वेनेऽवच्छेदकोपगमेतत्तदवच्छेदकस्वरूपतत्तन्निष्ठावच्छेदकताव्यक्तीनामेवतत्तदवच्छेदकस्यजन्यताव
च्छेदकसंबंधतयामूलाग्राद्यवच्छिन्नविभुसंयोगव्यक्तीनां अभेदेपिव्यभिचारानवकाशात् अन्यथा
मूलाद्यवच्छिन्नसंयोगस्याग्र्यवच्छिन्नतयातत्राप्यवच्छेदकतासंबंधेनतत्तत्संयोगव्यक्तीनामुत्पत्त्या
मूलादेस्तत्रव्यभिचारदुर्वारत्वात् नचमूलावच्छिन्नसंयोगानां अग्रावच्छिन्नसंयोगादेरिवप्राच्याद्यव
च्छिन्नसंयोगादेरपिभेदः स्वीकर्तुंशक्यते मूलेप्राच्यांशरीरवृक्षसंयोगइत्यादिप्रतीत्याएकसंयोग
व्यक्तावेवमूलप्राच्याद्यवच्छिन्नत्वावगाहनात् नचाग्रमूलयोः शरीरसंयोगइत्यस्याइवतादृशप्रती
तेरपिसंयोगद्वयावगाहित्वमस्मदनुमतमितिवाच्यं यत्रमूलप्रतीचीमात्रावच्छिन्नएकः शरीरसंयोगः
अग्रप्राचीमात्रावच्छिन्नश्चशरीरांतरसंयोगस्तत्रमूलेप्राच्यांशरीरसंयोगइतिभ्रमस्यापत्तेः शरीरतरुसंयो एम॰ २०
गव्यक्तीनांएकैकास्तामेवशरीरावयवेनवृक्षावयवेनचावच्छिन्नतयाव्यभिचारस्यापिदर्शितसंबंधसं

कोचमंतरेणादुर्वारत्वाच्च नहितत्रशरीरावयवावच्छिन्नशरीरतरुसंयोगमूलावच्छिन्नतदुभयसंयोगयोर्भेदसं
भवः तथासतिमूलावच्छिन्नवृक्षसंयोगस्यशरीरे चरणावच्छिन्नशरीरसंयोगस्यवृक्षे व्याप्यवृत्तितयातत्रद
भावासत्वप्रसंगात् तत्रस्वावच्छेदकावच्छिन्ननानासंयोगसाधारणातत्स्वावच्छेदकावच्छिन्नत्वमेवतत्तदवच्छे
दकजन्यतावच्छेदकंनतुसंयोगनिष्ठतत्तद्व्यक्तित्वं अनंतकार्यकारणभावप्रसंगात् तथाचैकावच्छिन्नसंयोग
स्यापरावच्छेदकावच्छिन्नत्वेपितदवच्छिन्नत्वविशिष्टस्यनान्यत्रोत्पत्तिरितिनव्यभिचारशंकेत्यपिवदंतिय
त्तु संयोगमात्रस्याव्याप्यवृत्तितासिद्धांतानुरोधेनमूलाग्रावच्छिन्नतरुविभुसंयोगादीनांभेदस्वीकारस्या
वश्यकत्वमिति तदपिनसम्यक् तादृशसंयोगव्यक्तीनांगगनादेर्दिग्देशविशेषरूपावच्छेदक नियमेनैवतादृ
शसिद्धांतसंगतेः अत्रवदंति द्रव्यमात्रएवसंयोगसामान्याभावस्याप्रामाणिकतोपास्तन्नेत्यादिनोक्ते
र्नचेत्यादिनागगनादौवैवसंयोगसामान्याभावसाधकमनुमानमाशंकितंविभुद्वयसंयोगानभ्युपगमे
नतत्राप्यवत्संयोगव्यक्तीनामिवप्रतिनियतदिग्देशावच्छिन्नतयातत्तद्व्यक्तित्वेनतत्रतदभावसत्वेऽविवा

ग० २१ 21 दात्तेनासिद्ध्यवकाशः विभुमात्रे संयोगसामान्याभावसिद्धावपि संयोगिद्रव्यत्वादिसाध्यादौ व्याप्त्यसंगतेर्वृक्षा
वेनतद्व्याप्यत्वात् संयोगसामान्याभावासिद्धावपि न क्षतिः प्रतियोग्यनवच्छेदकस्य तदभावावच्छेदकत्वनि
यमसत्त्वे च वृक्षत्वावच्छेदेन वृक्षादावपि संयोगसामान्याभावसिद्धेः संभवेन तत्रापि तदभावं साधयतां ता
दृशानियमवादिनामाशंकानं च प्रतियोग्यनवच्छेदकवृक्षत्वादेरभावावच्छेदकत्वमित्यादिना निराकरिष्य
ति पूर्वमपि वृक्षत्वावच्छेदेन संयोगसामान्याभाववृत्तेरविरोधमात्रेण प्रतियोग्यनवच्छेदकस्य तस्याभावा
वच्छेदकत्वनियमेनवातीत्याशयेनैव वृक्षादौ संयोगतत्सामान्याभावयोर्वृत्तावच्छेदकभेद उपपादितः
वृक्षेन संयोगवृत्तिप्रत्यक्षं च वारितं न तु योपदीत्यादि नियमस्यत्र तत्साधकत्वाशयेनेति न संदर्भविरोधः
पत्रयत्किंचिदवयवनाशान्महावृक्षनाशानंतरं खंडवृक्षोत्पत्तिक्षणे पूर्वोत्पन्नक्रियापातोऽवस्थिततया एम० २१
वत्त्रदवयवैर्गगनादिसंयोगानां विनाशः द्वितीयपक्षे च खंडवृक्षस्यापरावयवनाशस्तृतीयपक्ष

णे च तन्नाशस्तत्र वृक्षे विभुसंयोगात्तु सत्तायावद्विशेषाभावसौलभ्यं न चैवं तादृशवृक्षे मूर्त्तान्तरेणापि संयोग

स्तद्रवपवसंयोगजः जो वा न संभवतितद्रवपवृगगनादिसंयोगनाशकुकर्मणा मूर्त्तान्तरेण तद्रवपवसंयोग

नामपि तदुत्पत्तिकाले विनाशाद्रवयवावयविनोश्च संयोगानभ्युपगमेन स्वावयवसंयोगे तत्संयोगजन

नासंभवात्तदुत्पत्तिकाले च द्रव्ये गुणवत्कर्मसत्त्वानुपपत्तेरिति संयोगसाध्यके द्रव्यत्वस्य सद्धेतुत्वे वत

निर्वहतीति वाच्यं तादृशावयवद्रव्येन तद्रवपवसंयोगजन्यस्य तत्कर्मजन्यस्य च संयोगस्यासंभवेपि सर्वत्रै

वसत्तासद्गतिशील पवनादिपरमाणूनां कर्मभिस्तत्संयोगानामुत्पत्तेर्बाधकविरहेण द्रव्यस्य संयुक्त

त्वनियमादित्यपि केचित्। यावत्संयोगाभावाएवमान मिति। ज्ञायमानलिंगस्यानुमितिकरणत्वम

तामिप्रायेण यत्तदर्शयोरिति साध्यहेतुघटकपत्ततच्छब्दार्थयोः संयोगत्वघटत्वाद्योरित्यर्थः च्च

ननुगमादिति एकरूपेण निवेशासंभवादित्यर्थः सकव्याप्तेर्निर्वाढुमपि तुमशक्यत्वादि ति शेषः तथा

ग० २२
22

चघटत्वाद्यवच्छिन्नाभावघटादिविशेषाभावकूटयोर्व्याप्तिः संयोगसामान्याभावसिद्धावनुपयोगित्वाद्याव
त्संयोगविशेषाभावे संयोगसामान्याभावोपविशेषव्याप्तेश्चाग्रे निराकर्तव्यत्वात्तेनोक्तानुमानसंभव इति
भावः ननु प्रकृतहेतोः प्रकृतसाध्यव्याप्तेरग्रहेपि यथा योपत्रप्रवर्त्तते स कार्यतिपातज्ज्ञानातीत्याकारात
त्तनयानादिप्रवृत्तितद्विषयककार्यताज्ञानयोर्व्याप्तिग्रहात् गवानयनादिप्रवृत्तिरूपलिंगेन गवानय
नादिकार्यताज्ञानस्य सिद्धिः तथा प्रकृते संयोगीयावद्विशेषाभावेन तत्सामान्याभावव्याप्तेर्व्यर्थविशे
षणत्वादिनाग्रहेपि घटादिविशेषाभावकूटतात्सामान्याभावव्याप्तिग्रहादेव संयोगीयावद्विशेषा
भावेन हेतुना पक्षधर्मताबलात् गगनादिषु संयोगसामान्याभावसिद्धेर्वैर्व्यतिरेकिहेतुकानु
मितावपि सामान्यव्याप्त्यधीनविशेषसिद्धौ व्याप्तिविशिष्टपक्षधर्मताज्ञानस्य हेतुतानुपगमाच्च नच वि
शेषाभावांतरे सामान्याभावांतरव्याप्तिग्रहात् संयोगविशेषाभावेन तत्सामान्याभावसिद्ध्युपगमे यावत्वा

एम० २२

द्यविशेषितकपिसंयोगादिप्रतियोगिकाभावे कपिसंयोगादिसामान्याभावव्याप्तिग्रहादेव संयोगादिप्र
तियोगिकाभावेन तत्सामान्याभावसिद्धिसंभवाद्यावत्त्वादिविशेषणमनर्थकं प्रकृतहेतुतुल्यनिखिल
हेत्वंतरेषु तत्तद्विशिष्टतत्तत्पदार्थघटितप्रकृतसाध्यतुल्यसाध्यव्याप्तिग्रहापेक्षायाः स्वीकर्तुमशक्यत्वा
त् तादृशसकलहेतुसाध्यानामनुगमस्य सर्वज्ञेन ज्ञातुमशक्यत्वादिति वाच्यं उपस्थितयावत्ता
दृशहेतुषु तादृशतत्तत्साध्यव्याप्तिग्रहापेक्षया सामंजस्यात् तावन्मात्रापेक्षायाश्च तत्तत्साधनधर्मि
कतत्तत्साध्यव्याप्तिग्रहाभावविशिष्टतत्तत्साध्यसाधनोपस्थितेरनुमितिप्रतिबंधकतया सूपपाद
त्वात् एवं सति यावत्त्वविशेषणानुपादाने जात्यादिविशेषघटत्वाद्यभावे जात्यादिसामान्याभाव
व्यभिचारोपस्थितिदशायां संयोगादिसामान्याभावसाधनासंभवेन तादृशविशेषणसार्थक्या
त् गगनाद्यवृत्तित्वसमानाधिकरणनिरुक्तधर्मावच्छिन्नप्रतियोगिताकयत्किंचिदभावकं यद्य

न्याय

ग० त्वंतत्रदन्योपोधर्मः सत्तन्निष्ठाभावप्रतियोगितावच्छेदकद्वित्येताह नृयाउक्तसामान्यव्याप्तिस्थला
२३ भिषिक्तव्याप्त्यैववासंयोगत्वादोगगादिनिष्ठाभावप्रतियोगितावच्छेदकत्वंसाधनीयं तत्रवनान
नुगमोदोषइत्याशंक्यवक्तानुमानेउपाधिमाह एकावच्छेदेनेति